योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०७५

पञ्चसप्ततितमः सर्गः ७५

श्रीवसिष्ठ उवाच ।

अथाग्रस्थब्रह्मलोको ब्रह्मणि ध्यानशालिनि ।

निक्षिप्ताक्षः शनैर्दिक्षु दृष्टवानहमग्रतः ।। १

द्वितीयमर्कं मध्याह्ने पश्चादभ्युदितं स्फुटम् ।

दिग्दाहमिव दिग्वक्रे वनदाहमिवाचले ।। २

वह्निलोकमिव व्योम्नि वडवाग्निमिवार्णवे ।

ततोऽपश्यमहं दीप्तं सूर्यं नैर्ऋतदिङ्मुखे ।। ३

सूर्यं याम्ये ककुब्भागे सूर्यमग्निककुष्मुखे ।

सूर्यमैन्द्रककुब्भागे सूर्यमीशानदिङ्मुखे ।। ४

कुबेरककुभि सूर्यं सूर्यं वायव्यदिक्तटे ।

सूर्यं वरुणदिग्भागे तेन विस्मयवानहम् ।। ५

यावद्विचारयाम्याशु विधिवैधुर्यमाकुलम् ।

उदभूद्भूतलात्तावदर्क और्व इवार्णवात् ।। ६

एकादशेऽखिलार्काणां प्रतिबिम्बमिवोत्थितम् ।

उदभूत्त्रयमर्काणामन्तरे दिग्गणाम्बरे ।। ७

तद्धि रौद्रं वपुस्तत्र तन्मध्ये लोचनत्रयम् ।

तद्द्वादशपरीमाणं दीप्तं वृन्दं विवस्वताम् ।। ८

सर्वदिक्कं ददाहोच्चैः शुष्कं वनमिवानलः ।

अथोदभूज्जगत्खण्डशोषणग्रीष्मवासरः ।। ९

अनग्निरग्निदाहो द्रागदृश्योल्मुकगुल्मकः ।

अनग्निनाग्निदाहेन तेन तामरसेक्षण ।। १०

अङ्गानि दावदग्धानि खिन्नानीव ममाभवन् ।

प्रदेशं तमथ त्यक्त्वा दूरमारूढवानहम् ।। ११

दृढहस्ततलाघातहतकन्दुकवन्नभः ।

अपश्यं गगनस्थोऽहमुदितं चण्डतेजसम् ।। १२

तपन्तं द्वादशादित्यगणं दिक्षु दशस्वपि ।

बृहत्तत्र सतारावज्वालेव भगणं चलम् ।। १३

महाकुहकुहाशब्दं क्वथत्सप्ताब्धिडम्बरम् ।

सज्वालोल्मुकनीरन्ध्रलोकान्तरपुरान्तरम् ।। १४

ज्वालाघनपटाटोपसिन्दुरीकृतपर्वतम् ।

दीप्यमानमहागारस्थिरविद्युत्ककुत्पटम् ।। १५

स्फुरत्कटकटाटोपचटत्पत्तनमण्डलम् ।

विदधद्भूतलोद्भूतधूमदण्डैः शिलाघनैः ।। १६

काचस्तम्भसहस्राढ्यं भुवनस्थानमण्डपम् ।

क्वथद्भूतमहाभूतताराक्रन्दातिघर्घरम् ।। १७

भूतलोकपुरापातस्फुटच्चटचटोद्भटम् ।

ताराविशरणोद्धातघृष्टरत्नधरातलम् ।। १८

सर्वस्थलालयचलद्दह्यमानजनव्रजम् ।

क्षीणाक्रन्दक्वथद्भूतगणदुर्वासदित्तटम् ।। १९

उत्तप्ताम्बूदराखिन्नजलेचरमहार्णवम् ।

सर्वदिक्कानलप्लोषक्षीणाक्रन्दपुरान्तरम् ।। २०

विदलद्दग्धदिग्दन्तिदन्तोत्तम्भितभूधरम् ।

धराधरदरीरन्ध्रधूममण्डलकुण्डलम् ।। २१

पतत्पर्वतनिष्पिष्टप्लुष्टपत्तनमण्डलम् ।

पचत्पचपचाशब्दशब्दिताद्रीन्द्रकुञ्जरम् ।। २२

तापतप्तोन्नमद्भूतज्वरितार्णवपर्वतम् ।

हृदयस्फोटनिःसारपतद्विद्याधराङ्गनम् ।। २३

आक्रन्दरोदनश्रान्तमूर्धनिःसरणामरम् ।
नागलोकज्वलज्ज्वालापातालोत्तप्तभूतलम् ।। २४
शुष्कार्णवसदापक्वविवर्तोग्रजलेचरम् ।
और्वेणाबिन्धनाभावात्प्रोड्डीयेव सहस्रधा ।। २५
गतेन नृत्यतोत्थाय गृहीतगगनांगनम् ।
अथोदभूज्ज्वलज्ज्वालाकिंशुकांशुकशोभितः ।। २६
ताण्डवायेव कल्पाग्निस्तरलोल्मुकमाल्यवान् ।
तारं पटपटाटोपी रटद्भट इवोद्भटः ।। २७
ज्वालोद्भुजो धूमकचो जगज्जीर्णकुटीनटः ।
जज्वलुर्वनजालानि पुराणि नगराणि च ।। २८
मण्डलद्वीपदुर्गाणि जङ्गलानि स्थलानि च ।
सर्वखानि महाकाशमाशा दश दिवः शिरः ।। २९
श्वभ्ररूपारघट्टाट्टपट्टनोदारदिक्तटः ।
श्रृङ्गाणि सिद्धवृन्दानि गिरयः सागरार्णवाः ।। ३०
सरः सरस्यः सरितो देवासुरनरोरगाः ।
आशाः शनशनाशब्दैः पुरुषैश्च शिवार्चिषाम् ।। ३१
आसन्क्ष्वेडाकुराक्षस्यो ज्वालाजालोज्ज्वलोर्ध्वजाः ।
भमद्भमिति भांकारैर्भीषणैर्भूरिभस्मभिः ।। ३२
ज्वालाः श्वभ्राद्रिभूमीनां गुहाभ्यः परिनिर्ययुः ।
ज्वालोदरस्था अरुणाः समस्ता भूतजातयः ।। ३३
स्थलपद्मोदरालीनामाजहुः श्रियमश्रियः ।
सद्यो निःसृतरक्ताभैः सिन्दूराम्भोदसुन्दरैः ।। ३४
धगद्धगिति गायद्भिर्ज्वालाजालैर्जगद्गतैः ।
आसीद्रक्तांशुकैः कीर्णं संध्याभ्रैरिव वा नभः ।। ३५
उत्फुल्लकिंशुकवनैरुड्डीनैरिव वाऽऽवृतम् ।
और्वेण चावृता आसन्फुल्लाशोकवना इव ।। ३६

इव स्थलाब्जवलिता राविरा इव चार्णवाः ।

नानावर्णज्वलज्ज्वालाधूमविन्यासबन्धवान् ।। ३७

रूढं वह्निमिवाधातुं चित्रसौधलताश्रयम् ।

अनन्त इव विन्यास वनयौवनपावकः ।। ३८

उदयास्तमयादिभ्यो विन्ध्यो विधुरतामगात् ।

अङ्गारकल्पविटपैर्ज्वालावनविवल्गनैः ।। ३९

शनैरीषदिव क्षुब्धैः सह्योऽसह्यत्वमाययौ ।

मध्यमध्यकचत्कार्ष्ण्यभ्रमद्धूमालिमालितम् ।। ४०

वलज्ज्वालाब्जमलिनं दृष्टं सर इवाम्बरम् ।

खेऽद्रीणां शिखरे व्योम्नि शिखाशिखरशेखराः ।। ४१

ननृतुर्नीरसा नाशनर्तक्यः केतुकुन्तलाः ।

तलाहितानलज्वाला ब्रह्माण्डोर्ध्वकपाटभूः ।। ४२

तर्जनप्रोत्पतद्भूतधानौघा भ्रष्टभूमिका ।

क्वणच्छ्रेणी मृज्जलाग्निर्नानावर्णाननारुणा ।। ४३

हृत्प्रकोष्ठे जगल्लक्ष्म्याः सौवर्णीवाभवत्तदा ।

शैलाश्चटचटास्फोटैर्वृक्षाः कटकटारवैः ।। ४४

देशा हलहलोल्लासैरलं विदलनं ययुः ।

अब्धयः क्वथिताकाराः फेनिलोल्लासमांसलाः ।। ४५

वीचीकरतलाघातांश्चक्रुरर्कमुखे मुखे ।

अन्योन्यवेल्लितोल्लोलभूतलाकारपर्वतम् ।। ४६

जह्नुर्वीचीकरैर्देहे जडाः प्रकुपिता इव ।

आशाकाशाशिनामेषां गुहागुहगुहारवान् ।। ४७

पपाठ शब्द आग्नेयो ज्वालातटतटोद्भवः ।

लोकपालपुरापाततप्ताङ्गाराद्रिभित्तयः ।। ४८

दिशो दशापि वैवश्यं ययुरुन्मत्तवृत्तयः ।

काञ्चनद्रवसाद्रीन्द्रद्रुमागारगुहागृहः ।। ४९

शनैश्चार्वाकृतिर्मेरुरासीद्धिम इवातपे ।
क्षणेनैवानलात्तस्माद्धिमवाञ्जतुवद्द्रुतः ।। ५०
सर्वान्तःशीतलः शुद्धो दुर्जनादिव सज्जनः ।
तस्यामपि दशायां तु मलयोऽमलसौरभः ।। ५१
आसीत्त्यजत्युदारात्मा न नाशेऽप्युत्तमं गुणम् ।
नश्यन्नपि महान् ह्लादं न खेदं संप्रयच्छति ।। ५२
चन्दनं दग्धमप्यासीदानन्दायैव जीवताम् ।
न कदाचन संयाति वस्तूत्तममवस्तुताम् ।। ५३
प्रलयानलनिर्दग्धमपि हेम न नष्टवत् ।
द्वे हेमनभसी तस्मिन्न नष्टे प्रलयानले ।। ५४
तयोरेव वपुः श्लाघ्यं सर्वनाशेऽप्यनाशयोः ।
नभो विभुतयाऽनाशि हेमाकृष्टतयाक्षयम् ।। ५५
सत्त्वमेकं सुखं मन्ये न रजो न च वा तमः ।
चलदुच्चवनानीव विकीर्णाङ्गारवर्षणः ।। ५६
दग्धाब्दाद्रिर्महाधूमज्वालोऽभूद्वह्निवारिदः ।
रसविस्मरणार्तानां शून्यानां स्फारदेहिनाम् ।। ५७
शुष्काणां व्योमविटपिपत्राणां पात्ररूपिणाम् ।
वारिदानां सवारीणां दग्धानां प्रलयार्चिषा ।। ५८
ज्ञस्येवाङ्ग न दोषाणां दृष्टं भस्मापि न क्वचित् ।
न लङ्घयति कैलासं यावदुल्लसितोऽनलः ।। ५९
तावत्तं कल्पकुपितो रुद्रो नेत्राग्निनादहत् ।
दाहस्फुटद्द्रुमस्थूलशिलाचटचटारवाः ।। ६०
लकुटोपललोष्टौघैरयुध्यन्तेव भूभृतः ।
ज्वालाघनघटाटोपसावतंसचलान्तिमाः ।। ६१
बभूवुर्व्योमविकसत्स्थूलपद्मवना इव ।
सर्गः कदाचिदेवासीदित्यगात्स्मरणीयताम् ।। ६२

कल्पान्तः स्मारयन्मूर्खानगादस्मरणीयताम् ।

तापोपतापपरमाः परमारणतत्पराः ।

वह्नयोऽपह्नवं चक्रुर्जगतामसतामिव ।। ६३

ववुरशनिनिपातपीडिताङ्गाः

कचदनलोल्मुकगुल्ममण्डलाभाः ।

प्रलयसमयवायवोऽनलान्ता-

द्दलदमरावलयो लये लिहन्तः ।। ६४

व्यालोलस्फुटदानलद्रुमवनप्रोद्धूतभस्मोष्मणा

दत्ताभ्राभ्रमदुल्मुकाहतिवहत्साङ्गारगौरार्चिषः ।

भ्रश्यत्पावकशृङ्गमध्यविलसज्ज्वालावलीश्यामला

निःशेषाग्निनिकाशसुस्तवजवा वेगेन वाता ववुः ।।

इत्यार्षे श्रीवासिष्ठमहा० वा० दे० मो० निर्वाणप्रकरणे उ० पाषा० महाकल्पान्ताग्निवर्णनं नाम पञ्चसप्ततितमः सर्गः ।। ७५ ।।